वियोजितः, त्रि, वियोगं प्रापितः। विपूर्ब्बभ्रान्त-युजधातोः क्तप्रत्ययेन निष्पन्नः ॥
विरक्तः, त्रि, (वि+रन्ज+क्तः।) विरागयुक्तः। अननुरक्तः। यथा,—
"ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥"
इति श्रीभागवते ११ स्कन्धे १८ अध्यायः ॥
(यथा च।
"त्वयि प्रसन्ने मम किं गुणेन
त्वय्यप्रसन्ने मम किं गुणेन।
रक्ते विरक्ते च वरे वधूनां
निरर्थकः कुङ्कुमराग एषः ॥"
इत्युद्भटः ॥)
विरक्ता, स्त्री, दुर्भगा। इति त्रिकाण्डशेषः ॥ अननुकूला। यथा, नीतिशतके। १।
"यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनोऽन्यरक्तः।
अस्मत्कृतेऽपि परितुष्यति काचिदन्या
धिक् ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च ॥"
विरक्तिः, स्त्री, (वि+रन्ज+क्तिन्।) विरागः। यथा,—
"देहो गुरुर्मम विरक्तिविवेकहेतु-
र्बिभ्रत् स्म सत्त्वनिधनं सततार्त्त्युदर्कम्।
तत्त्वान्यनेन विमृशामि यथा तथापि
पारक्यमित्यवसितो विचराम्यसङ्गः ॥"
इति श्रीभागवते। ११। ९। २५ ॥
विरङ्गं, क्ली, कङ्कुष्ठम्। इति राजनिर्घण्टः ॥
विरचितः, त्रि, (वि+रच+क्तः।) विशेषेण रचितः। निर्म्मितः। यथा,—
"एष श्रीलहनूमता विरचिते श्रीमन्महानाटके
वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः ॥"
इत्यादि महानाटकम् ॥
विरजस्तमाः, [स्] पुं, सत्त्वगुणविशिष्टः। तत्पर्य्यायः। द्वयातिगः २। इत्यमरः।२।७।४५।
"विगते रजस्तमसी येषां ते रजस्तमोगुणशून्याः सत्त्वैकनिष्ठाः साक्षात्कृतब्रह्माणो जीवन्मुक्ता व्यासादयो द्वयातिगा उच्यन्ते। द्वयं द्वैतं अतिक्रम्य गच्छति इति डः।" इति भरतः ॥
विरजाः, [स्] स्त्री, (विनिवृत्तं रजः शोणितं यस्याः।) विगतार्त्तवा। इति जटाधरः ॥ (नास्ति रजो धूलिर्यत्र। धूलिरहिते, त्रि। यथा, महाभारते। १। ९३। १५।
"सर्व्वैरिदानीं गन्तव्यं सह स्वर्गजितो वयम्।
एष नो विरजाः पन्था दृश्यते देवसद्मनः ॥"
निर्म्मलः। यथा, महाभारते। २। ७। ५।
"विरजोऽम्बरचित्रमाल्यो ब्रीकीर्त्तिद्युतिभिः सह ॥"
पुं, नागविशेषः। यथा, महाभारते।१।३५।१४।
"विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान् ॥")
विरजा, स्त्री, कपित्थानीवृक्षः। इति रत्नमाला ॥ दूर्व्वा। इति हारावली ॥ ययातिमाता। यथा,
"उत्पन्नाः पितृकन्यायां विरजायां महाबलाः।
यतिर्ययातिः संयातिरायातिः पञ्चमो शुकः।
तेषां ययातिः पञ्चानां महाबलपराक्रमाः ॥"
इति कौर्म्मे २० अध्यायः ॥
श्रीकृष्णसखी। सा राधाभयात्त्यक्तप्राणा सती सरिद्रूपाभवत्। तस्याः सप्त पुत्राः सप्त समुद्रा अभवन्। यथा,—
"एकदा राधिकासार्द्धं गोलोके श्रीहरिः स्वयम्।
विजहार महारण्ये निर्ज्जने रासमण्डले ॥
कृत्वा विहारं श्रीकृष्णस्तामदृष्ट्वा विहाय च।
गोपिकां विरजामन्यां शृङ्गारार्थं जगाम ह ॥
दृष्ट्वा च श्रीहरिस्तूर्णं विजहार तया सह।
तयासक्तं श्रीहरिञ्च रत्नमण्डपसंस्थितम् ॥
दृष्ट्वा च राधिकान्याश्च चक्रुस्ताश्च निवेदनम्।
जगाम सहसा देवी तं रत्नमण्डपं मुने ॥
द्वारे नियुक्तं ददर्श द्वारपालं मनोहरम्।
तमुवाच रुषा देवी रक्तपङ्कजलोचना ॥
दूरं गच्छ गच्छ दूरं रतिलम्पटकिङ्कर!।
कीदृशीं मत्परां कान्तां द्रक्ष्यामि तत्प्रभो-रहम् ॥
श्रुत्वा कोलाहलं शब्दं गोपिकानां हरिः स्वयम्।
ज्ञात्वा च कोपितां राधामन्तर्धानं चकार ह ॥
विरजा राधिकाशब्दात् अन्तर्धानं हरेरपि।
दृष्ट्वा राधाभयार्त्ता सा जहौ प्राणांश्च योगतः ॥
सद्यस्तत्र सरिद्रूपं तच्छरीरं बभूव ह ॥
व्याप्तञ्च वर्त्तुलाकारं तया गोलोकमेव च।
कोटियोजनविस्तीर्णं प्रस्थेऽतिनिम्नमेव च ॥
दैर्घ्ये दशगुणं चारु नानारत्नाकरं परम्।
राधा रतिगृहं गत्वा न ददर्श हरिं मुने ॥
विरजाञ्च सरिद्रूपां दृष्ट्वा गेहं जगाम सा।
श्रीकृष्णो विरजां दृष्ट्वा सरिद्रूपां प्रियां सतीम् ॥
उच्चै रुरोद विरजातीरे नीरमनोहरे।
त्वया विनाहं सुभगे कथं जीवामि सुन्दरि! ॥
नद्यधिष्ठातृदेवी त्वं भव मूर्त्तिमती सति।
पुरातनं शरीरं ते सरिद्रूपमभूत् सति ॥
जलादुत्थाय चागच्छ विधाय नूतनां तनूम्।
आजगाम हरेरग्रं साक्षाद्राधेव सुन्दरी ॥
पश्यन्तं प्राणनाथञ्च पश्यन्ती वक्रचक्षुषा।
ताञ्च रूपवतीं दृष्ट्वा प्रेमुग्धोद्रेका जगत्पतिः ॥
चकारालिङ्गनं तूर्णं चुचुम्ब च मुहुर्मुहुः।
नानाप्रकारशृङ्गारविपरीतादिकं प्रभुः ॥
रहसि प्रेयसीं प्राप्य चकार च पुनः पुनः।
विरजा सा रजोयुक्ता धृत्वा वीर्य्यममोघकम् ॥
सद्यो बभूव तत्रैव धन्या गर्भवती सती।
तस्थौ तत्र सुखासीना सार्द्धं पुत्रैश्च सप्तभिः ॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्ज्जने।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा ॥
एतस्मिन्नन्तरे तत्र मातुः क्रोड़ं जगाम ह।
कनिष्ठपुत्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया ॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः।
क्रोड़े चकार बालं सा कृष्णो राधागृहं ययौ।
प्रबोध्य बालं सा साध्वी न ददर्शान्तिकं प्रियम्।
विललाप भृशं तत्र शृङ्गारातृप्तमानसा ॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यसि।
शशाप सर्व्वान् बालांश्च यान्तु मूढ़ा रसातलम् ॥
श्रुत्वा विवरणं सर्व्वे प्रजग्मुर्धरणीतलम्।
सप्तद्वीपे समुद्राश्च सप्त तस्थुर्व्विभागशः ॥
कनिष्ठाद्दृढपर्य्यन्तं द्विगुणं द्विगुणं मुने।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः।
एतेषाञ्च जलं पृथ्व्यां शस्यार्थञ्च भविष्यति ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २।३ अध्यायौ ॥
जगन्नाथक्षेत्रम्। यथा,—
"उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥"
इति तन्त्रचूड़ामणौ ५१ पीठनिर्णयः ॥*॥ तत्र मुण्डनोपवासौ न कर्त्तव्यौ। यथा। स्कान्दे।
"मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः।
वर्जयित्वा गयां गङ्गां विशालां विरजां तथा ॥"
इति प्रायश्चित्ततत्त्वम् ॥
विरञ्चः, पुं, ब्रह्मा। इति हेमचन्द्रः ॥
विरञ्चिः, पुं, ब्रह्मा। इति हेमचन्द्रः ॥
विरणं, क्ली, वीरणतृणम्। इति शब्दरत्नावली ॥
विरतः, त्रि, (वि+रम+क्तः।) निवृत्तः। यथा—
"आत्तविद्यो मुनेर्जातो भ्रातुस्तातो निजेर्भवात्।
विरतोऽन्तर्हितो दुष्टाच्छोकाद्रामेण वारितः ॥"
इति मुग्धबोधव्याकरणम् ॥
विरतिः, स्त्री, (वि+रम+क्तिन्।) निवृत्तिः। तत्पर्य्यायः। आरतिः २ अवरतिः ३ उपरामः ४। इत्यमरः ॥ उपरमः ५ विरामः ६। इति भरतः ॥ (यथा, कथासरित्सागरे। १०१। ६।
"कष्टाच्च दुःखदीर्घायां गतायां विरतिं निशि ॥")
विरलं, क्ली, दधि। इति राजनिर्घण्टः ॥
विरलः, त्रि, अवकाशः। फाक् इति भाषा। तत्पर्य्यायः। पेलवः २ तनुः ३। इत्यमरः ॥ (यथा, बृहत्कथायाम्। ६७। ३।
"शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ ॥")
विरलद्रवा, स्त्री, (विरलो निर्म्मलो द्रवो यस्याः।) श्लक्ष्णयवागूः। यथा,—
"यवागूरुष्णिका श्यामा सैव तु द्रुतसिक्थिका।
विलेपी तरला च स्यात् सा श्लक्ष्णा विरलद्रवा ॥"
इति जटाधरः ॥
विरहः, पुं, (वि+रह त्यागे+घः।) विच्छेदः। तत्पर्य्यायः। विप्रलम्भः २ विप्रयोगः ३ वियोगः ४। इति हेमचन्द्रः ॥*॥ (यथा, साहित्यदर्पणे। १०।
"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः।